# निरयावलिकोपनिषद्



# निरयावलियाओ
# कप्पवडिंसियाओ
# पुप्फियाओ
# पुप्फचूलियाओ
# वण्हिदसाओ

परमपूजनीयश्रीस्थविरभगवत्प्रणीत-

श्रीनिरयावलिकाश्रुतस्कन्धस्य

सारसञ्चयरूपा

# निरयावलिकोपनिषद्


• सञ्चयनम् - सम्पादनम् •

प्राचीनश्रुतोद्धारक

प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः



प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

મૂળસૂત્રો : **નિરયાવલિકા શ્રુતસ્કંધ**

(૧) નિરયાવલિકા (કલ્પિકા) (૪) પુષ્પચૂલિકા
(૨) કલ્પાવતંસિકા (૫) વૃષ્ણિદશા
(૩) પુષ્પિકા

મૂળસૂત્રકાર : પૂજનીય શ્રીપૂર્વાચાર્ય

મૂળસૂત્રભાષા : અર્ધમાગધી

સારસંચય : નિરયાવલિકોપનિષદ્

સંચય + સંપાદન : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી
**હેમચંદ્રસૂરીશ્વરજી** મહારાજાના
શિષ્ય પ.પૂ.આ.શ્રી
**કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા


વિ. સં. ૨૦૬૮ • વી. સં. ૨૫૩૮ • સને ૨૦૧૨

પ્રથમ આવૃત્તિ, પ્રતિ : ૫૦૦


• માત્ર ગુર્વનુજ્ઞાત શ્રમણ ભગવંતો માટે. •

*No Copyright. • Reproduction Welcome.*

## પ્રાપ્તિસ્થાન

### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ


18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com

---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

***Website : www.divineKnowledge.org.in***

# चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




## અનરાધાર અનુગ્રહ



# अनन्तलब्धिनिधानः श्रीगौतमस्वामी

## पञ्चमगणधरः श्रीसुधर्मास्वामी



# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

# ❀ પ્રકાશકીય ❀

કુશળ અધ્યાપકોની અધ્યાપનશૈલી એવી હોય છે, કે તેઓ પહેલા આખો પદાર્થ સમજાવી દે, પછી કહે, 'હવે ચોપડી ખોલો, ને વાંચો.' વાંચતા જઈએ ને જાણે વાર્તા હોય, એમ સમજાતું જાય. દુર્ગમ ગ્રંથ પણ સુગમ બની જાય.

આ જ શૈલી આગમ-અધ્યયનમાં પણ ઉપયોગી બને, એ માટે કુશળ અધ્યાપકની ગરજ સારે તેવી આ આગમ ઉપનિષદ્‌ની શ્રેણિ પ્રકાશિત કરતા રોમહર્ષ અનુભવીએ છીએ. અધિકારી સંયમી ભગવંતોનો આગમ-અભ્યાસ આ શ્રેણિ દ્વારા સુગમ બને...

અને અભ્યાસ બાદ પણ આ વિહારોપયોગી પ્રકાશનના આલંબને દીર્ઘ કાળ સુધી આગમિક પદાર્થોના પરાવર્તન થતા રહે... આ ઉપહાર આપણને બહુશ્રુતોનો ઉપહાર આપે.. એવી સહજ સંવેદના થાય છે. વંદન... પરમ કૃપાળુ પરમાત્માને. વંદન... પૂજનીય શ્રીગણધર ભગવંતો આદિ પૂર્વાચાર્યોને. વંદન... આગમ અધ્યયનનું આ આલંબન આપનાર પૂજ્યશ્રીને.

*લિ.*

***શ્રી જિનશાસન આરાધના ટ્રસ્ટ***


## ટ્રસ્ટીઓ

શ્રી ચંદ્રકુમાર જરીવાલા  શ્રી પુંડરીકભાઈ શાહ
શ્રી લલિતભાઈ કોઠારી  શ્રી વિનયચંદ્ર કોઠારી

णमोत्थु णं समणस्स भवगओ महावीरस्स
श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

*Example*

ઉપદેશ કરતાં ય
વધુ અસરકારક હોય છે
ઉદાહરણ.

અહીં પ્રસ્તુત છે
સંખ્યાબંધ ઉદાહરણો
હકારાત્મક પણ
નકારાત્મક પણ
પસંદ... આપણી.

– આ. કલ્યાણબોધિસૂરિ

अथ

# निरयावलिकोपनिषद्

श्री वर्द्धमानं जिनवर्द्धमानं
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं रमणीयरम्यं
श्रीकल्पिकादौ कथये रहस्यम्॥

## ॥ अथ निरयावलिकोपनिषद्॥

क उपाङ्गानामर्थं श्रीवीरोक्तः - इति श्रीजम्बूस्वामिना पृष्टः श्रीसुधर्मस्वाम्याह- भगवतोपाङ्गानां पञ्च वर्गाः प्रज्ञप्ताः,

तद्यथा-निरयावलिकाः, कल्पावतंसिकाः, पुष्पिकाः, पुष्पचूलिकाः, वृष्णिदशाः।

(१) **निरयावलिकाः** - दशात्राध्ययनानि- कालः, सुकालः, महाकालः, कृष्णः, सुकृष्णः, महाकृष्णः, वीरकृष्णः, रामकृष्णः, पितृसेनकृष्णः, महासेनकृष्णः।

(१) **कालः** - जम्बूद्वीप-भरते चम्पायां कूणिकस्य लघुमाता श्रेणिकभार्या **कालीदेवी**। तत्पुत्रः **कालः**। सोऽन्यदा कदाचित् ३००० हस्तिभिः ३००० रथैः ३००० अश्वैः कोटित्रयमनुष्यैश्चोरीकृत-

गरुडव्यूह एकादशमखण्डेन कूणिकेन राज्ञा सह **रथमुसलसङ्ग्राममवतीर्णः**। तन्मातुः पुत्रजीवनादिगोचरः सङ्कल्पः। श्रीवीरपार्श्वे पृच्छा। भगवता कथनम् - तव पुत्रो युध्यन् प्रवरवीरादिघातमथनानि कुर्वन् दिशश्च निरालोकाः कुर्वन् चेटकराज्ञः सपक्षं सप्रतिदिशि रथेन प्रतिरथमागतः, वैशाख-स्थानस्थितचेटकेनेषुं कर्णायतं कृत्वैक-प्रहारेणैव **जीविताद्व्यपरोपितः** कालः कुमारः, अतो नातस्त्वं तं जीवन् द्रक्ष्यसि - इति। काल्या महत्पुत्रशोकव्याप्तिः, प्रति-गमनं च।

गौतमस्वामिपृष्टेन भगवता तद्गति-कथनम् - **चतुर्थ्यां पृथ्व्यां हेमाभनरके** १० सागरस्थितिकतयोपपन्न इति। कथ-मित्यत्र भगवद्वचः - **श्रेणिकभार्याया-श्चेल्लणायाः** सिंहस्वप्नसूचितगर्भः, तदनु-भावतः पत्युदरमांसदोहदः, अभयकुमार-युक्त्या तत्सम्पूर्त्तिः, पितृशत्रुभूतोऽयं गर्भ इति प्रतीत्य मात्रा तत्पातनप्रयासः, तद्वै-फल्यम्, जन्मानन्तरं कचवरे तत्त्यागः, श्रेणिकेन प्रत्यानयनम्, कुर्क्कुटपिच्छकृतक्ष-ततया तदङ्गुल्या पूयरुधिरगलनं वेदना-तिशयश्च, श्रेणिकेन स्वकीयाऽऽस्यप्रयोगेण

तद्वेदनोपशमः, **कूणिकनामस्थापना**, यावत्परिणयः, अष्टकन्यादिव्यतिकरो मेघवत्। कालादिदशकुमारैः सह परामृश्य कूणिकेन **श्रेणिकं निगडबद्धं कृत्वा** राज्यादिकमेकादशभागैर्विभज्य **स्वयं राज्यश्रीकरणम्**।

अन्यदा मात्रा ज्ञातस्वपितृस्नेहस्य सञ्जातानुशयस्य पितृमोचनार्थं परशुहस्तस्य चारक आगमनम्, कुत्सितमृत्युशङ्क्या **श्रेणिकस्य तालपुटविषभक्षणम्, मरणम्**, कूणिकशोकादिः, राजगृहाच्चम्पायामागमनम्।

॥ ५ ॥

**श्रेणिक-चेल्लणयोः पुत्रस्य विहल्लकुमारस्य** जीवतैव श्रेणिकराज्ञा सेचनकहस्ति- अष्टादशवक्रहारदानम्, सान्तःपुरस्य तस्य हस्तिना गङ्गानद्यां विलसनम्, तस्यैव परमार्थतो राज्यश्रीः - इति लोकवादं श्रुत्वा **पद्मावत्यास्त**द्याचनार्थं कूणिकाग्रे पुनः पुन**र्निर्बन्धकरणम्**। कूणिकेन तद्याचने विहल्लेन राज्यार्धयाचनम्। तदनादरं कुर्वतः पुनः पुनश्च सेचनक - अष्टादशवक्रहारौ याचमानस्य च **कूणिकस्य शङ्क्या** सेचनक-हार-अन्तःपुर-परिवारसहितस्य

विहल्लस्य **वैशाल्यामागमनम्**, आर्यक-चेटकोपसम्पद्ग्रहणं च।

चेटककृतः कूणिकदूतानादरः, युद्धम्, एकतः कालादि १० कुमारसहितः कूणिकः, अपरतो ९ मल्लकिनः + ९ लेच्छकिनः = १८ गणराजसहितश्चेटको राजा। कूणिकः ३३००० हस्तिभिर्यावत् ३३ मनुष्यकोटिभिः परिवृतः गरूडव्यूहं रचयाञ्चकार। चेटकः ५७००० हस्तिभि-र्यावत् ५९ मनुष्यकोटिभिः परिवृतः शकट-व्यूहं रचयाञ्चकार।

ततो रथमुसलसङ्ग्रामे द्वेऽप्यनीके सम्प्रलग्ने। महज्जनक्षयः, नृत्यत्कबन्धवार-भीमत्वम्, रुधिरकर्दमश्च तद्युद्धे। ततः **कालकुमारस्तत्र** भगवदुक्तरीत्या **जीवि-ताद् व्यपरोपितः**, इदृशैरारम्भादिभिश्चो-क्तगतिं गतः। तत उद्वर्त्य दृढप्रतिज्ञवद् **विदेहे सेत्स्यति**। (२-१०) एवं **सुकालादि**वक्तव्यता अपि ज्ञेयाः, नवरं सुकालीत्यादिमातृनामधेयानि ज्ञेयानि।

(२) **कल्पावतंसिका** - दशात्राध्य-यनानि (१) **पद्मः** - **श्रेणिक-काल्योः**

पुत्रः **कालः**, तद्भार्या **पद्मावती**, तत्पुत्रः **पद्मः** सिंहस्वप्नसूचितः, यावदष्टकन्यापरिणयादिव्यतिकरः, श्रीवीरदेशनाश्रुतिर्यावत् प्रव्रज्या, ११ अङ्गाध्ययनम्, बहुचतुर्थादितपश्चर्या, भगवन्तमापृच्छ्य **विपुलगिरौ पादपोपगमनम्**, मासिकानशनेन कालगतः।

गौतमस्वामिप्रश्नः, भगवता तद्गतिकथनम् - **सौधर्मे** सागरद्वयायुर्देवतयोत्पन्न इति। ततश्च्युत्वा दृढप्रतिज्ञवद् विदेहे सेत्स्यतीति।

(२-८)

| अध्य | कुमारः | पिता | माता | पर्यायः वर्षाणि | कल्पः |
|---|---|---|---|---|---|
| २ | महापद्मः | सुकालः | महापद्मा | ५ | २ |
| ३ | भद्रः | महाकालः | भद्रा | ४ | ३ |
| ४ | सुभद्रः | कृष्णः | सुभद्रा | ४ | ४ |
| ५ | पद्मभद्रः | सुकृष्णः | पद्मभद्रा | ४ | ५ |
| ६ | पद्मसेनः | महाकृष्णः | पद्मसेना | ३ | ६ |
| ७ | पद्मगुल्मः | वीरकृष्णः | पद्मगुल्मा | ३ | ७ |
| ८ | नलिनीगुल्मः | रामकृष्णः | नलिनीगुल्मा | ३ | ८ |
| ९ | आनन्दः | पितृसेनकृष्णः | आनन्दा | २ | ९ |
| १० | नन्दनः | महासेनकृष्णः | नन्दना | २ | १२ |

शिष्टं प्रथमवत्। सर्वेषां स्वस्वकल्पप्रायोग्यमुत्कृष्टमायुर्ज्ञेयम्।

(३) **पुष्पिका** - दशात्राध्ययनानि।

(१) **चन्द्रः** - राजगृहे गुणशिलचैत्ये श्रीवीरसमवसरणम्, सूर्याभवज् ज्योतिष्कराज**चन्द्रस्यागमनम्**, नाट्यविधिं दर्शयित्वा प्रतिगमनम्।

गौतमस्वामिपृच्छया भगवता तत्प्राग्भवकथनम्, श्रावस्त्यां **गाथापतिरङ्गतिः**, श्रीपार्श्वनाथसमीपे प्रव्रज्या, ११ अङ्गाध्ययनम्, बहुचतुर्थादितपश्चर्या,

बहुवर्षश्रमणपर्यायं पालयित्वा **विराधित-श्रामण्यस्य** मासिकानशनेन कालं कृत्वा ज्योतिष्केन्द्रचन्द्रतयोपपातः, लक्षवर्षाधिकं पल्योपमं स्थितिः। ततश्च्युत्वा विदेहे सेत्स्यति।

(२) **सूर्यः** - सुप्रतिष्ठो गाथापतिः, शेषं सर्वं सूर्यवत्।

(३) **शुक्रः** - वाणारस्यां **सोमिलो ब्राह्मणः**, प्रभुपार्श्वसमीपे यात्रादिगोचर-प्रश्नानि भगवतीवत्। सम्बोधिः, **श्रावक-धर्मप्रतिपत्तिः**, भगवद्विहारः, अन्यदा

साधुदर्शनाद्यभावतः सोमिलस्य **मिथ्यात्वप्रतिपत्तिः**, अन्यदाऽऽम्राद्यारामानां तेनारोपणम्।

अन्यदा **दिक्प्रोक्षिततापसदीक्षा**, नित्यषष्ठतप आतापना च। पारणके क्रमेण पूर्वादिदिक्प्रोक्षणम्, दर्भादिग्रहणम्, अग्निहोमकरणम्, चरुसाधनम्, बलिदानम्, अतिथिपूजनम्, ततः स्वयमाहारग्रहणम्।

अन्यदा तापसानापृच्छ्य काष्ठमुद्रया मुखं बद्ध्वो**त्तराभिमुखं प्रस्थानम्**, यत्रापि निम्नादौ पातः, न ततः प्रत्युत्थानं कार्यमिति तत्प्रतिज्ञा।

मध्यरात्रे तदन्तिके **देवप्रादुर्भावः**, भो प्रव्रजित ! सोमिलब्राह्मण ! **दुष्प्रव्रजितं ते** - इति तेन कथनम्, सोमिलस्यानादरेण तूष्णीम्भावः एवं प्रतिरात्रं कथिते सकृत् सोमिलस्य हेतुप्रश्नः, देवेन प्राक्प्रतिपन्न-श्रावकधर्मस्मारणम्, पुनस्तत्प्रतिपत्तौ **सुप्र-व्रजितं** भवेदिति कथनम्।

सोमिलेन तथाकरणम्, बहुचतुर्थादि-तपःकरणम्, बहुवर्षाणि श्रमणोपासक-पर्यायपालनम्, पाक्षिकानशनेनानालोचित-प्रतिक्रान्तस्य **विराधितसम्यक्त्वस्य** कालं

कृत्वा शुक्रावतंसके विमाने **शुक्रमहाग्रहतयोपपातः।** स्थितिः पल्योपमम्। आयुःक्षये **विदेहे सेत्स्यति।**

(४) **बहुपुत्रिका - सौधर्मे** बहुपुत्रिके विमाने सुधर्मसभायां बहुपुत्रिके सिंहासने **बहुपुत्रिका देवी,** अवधिना राजगृह-गुणशिलचैत्य-समवसृतश्रीवीर-दर्शनम्, **सूर्याभवदागमनम्,** देशनां श्रुत्वा **नाट्यविधिं** दर्शयित्वा प्रतिगमनम्।

गौतमस्वामिपृच्छायां भगवता तत्प्राग्भवकथनम् - वाणारस्यां **भद्रः** सार्थवाहः,

**सुभद्रा** भार्या, सा च वन्ध्या। **सुव्रता-ऽऽर्या**शिष्यापार्श्वे पुत्रपुत्र्यन्यतरप्राप्त्यर्थं विद्याप्रयोगादियाञ्चा। न कल्पतेऽस्माकमेतच्छ्रोतुमपि, किम्पुनर्दर्शयितुम् ? नवरं तुभ्यं केवल्युक्तधर्मं कथयामः - इत्युक्त्वा धर्मकथा, सुभद्रायाः **श्रावकधर्म-प्रतिपत्तिः**, अन्यदा सुव्रताऽऽर्यासमीपे प्रव्रज्या।

अन्यदा तस्या बहुजनस्य बालकेषु मूर्च्छा, तेषामभ्यङ्गनादिकरणम्, एवं च पुत्रादिपिपासासन्तर्पणम्। न कल्पतेऽस्माकं

**जातकधर्म**, अत एतत्स्थानस्यालोचय यावत् प्रायश्चित्तं प्रतिपद्यस्वेति सुव्रता-ऽऽर्ययोक्ते तदनादरः। ततः श्रमणीभिर्निन्द्य-मानाया अभीक्ष्णं निवार्यमाणायाश्च **पृथगु-पाश्रये गमनम्**, तत्र स्वच्छन्दं बालका-नामभ्यङ्गनादिकरणम्, एवं बहुवर्षश्रा-मण्यपर्यायं पालयित्वा पाक्षिकानशनेनाना-लोचितप्रतिक्रान्तायाः कालं कृत्वा **सौधर्मे बहुपुत्रिकादेवीतयोपपातः**। सा हि बहु-दारकदारिकाः विकुर्व्य शक्रपार्श्व उपागम्य दिव्यां देवर्द्धिं दर्शयतीति बहुपुत्रिकोच्यते। स्थितिः - ४ पल्योपमानि।

तद्भावि - **ततश्च्युत्वा** जम्बूद्वीप-भरते विन्ध्यगिरिपादमूले **ब्राह्मणकुले** पुत्रीतया जन्म, **सोमा**-नामस्थापनम्। यौवनप्राप्तौ पितृभ्यां भागिनेयेन राष्ट्रकूटेन सार्धं परिणायनम्, **प्रतिसंवत्सरं युगल-प्रसूतिः**, ततो बहुपुत्रादिपालनव्यग्रतया मूत्राद्युपलिप्राया मलिनवसनाया अशुचि-बीभत्सायाः परमदुर्गन्धाया राष्ट्रकूटेन सह **भोगानुभवासामर्थ्यम्**, वन्ध्या एव धन्येति चिन्तनम्।

सुव्रताऽऽर्यापार्श्वे धर्मं श्रुत्वा **श्रावक**-

**धर्मोरीकारः**, अन्यदा तत्पार्श्वे **प्रव्रज्या**, ११ अङ्गाध्ययनम्, बहुषष्ठादितपश्चर्या, मासिकानशनेनालोचितप्रतिक्रान्तायाः कालं कृत्वा **शक्रसामानिकतयोपपातः**, स्थितिः सागरद्वयम्, च्युत्वा **विदेहे सिद्धिः**।

(५) **पूर्णभद्रः** - **सौधर्मे** पूर्णभद्रे विमाने सुधर्मसभायां पूर्णभद्रे सिंहासने **पूर्णभद्र देवः**, अवधिना राजगृह-गुणशिलगत-श्रीवीरं ज्ञात्वा **सूर्याभव-दागम्य** यावन् **नाट्यविधिं** दर्शयित्वा प्रतिगमनम्।

गौतमस्वामिपृच्छायां भगवता तत्प्राग्भवकथनम् - जम्बूद्वीप-भरते मणिवतिकायां नगर्यां **पूर्णभद्रो गाथापतिः**, स्थविरभगवदन्तिके धर्मं श्रुत्वा **प्रव्रज्या**, ११ अङ्गाध्ययनम्, बहुचतुर्थादितपःकरणम्, बहुवर्षश्रामण्यपर्यायपालनम्, मासिकानशनेनालोचितप्रतिक्रान्तस्य, समाधिप्राप्तस्य कालं कृत्वा **पूर्णभद्रदेवतयोपपातः**, स्थितिः सागरद्वयम्, ततश्च्युत्वा **विदेहे सेत्स्यति**।

(६) **माणिभद्रः** - मणिवत्यां **माणिभद्रो** गाथापतिः, शेषं प्राग्वत्,

विमानं देव सदृशनाम।

(७-८) **दत्तः**, **शिवः**, बलः, **अनादृतः** - उक्तवत्। नवरं प्राग्भवे दत्तश्चन्दापुर्याम्, शिवो मिथिलायाम्, बलो हस्तिनापुरे, अनाहृतश्च काकन्द्याम्।

(४) **पुष्पचूला** - दशात्राध्ययनानि।

(१) **श्रीः** - सौधर्मे श्री-अवतंसके विमाने सुधर्मसभायां श्रीसिंहासने **श्रीदेवी**, यावद् भगवतो **नाट्यविधिं** दर्शयित्वा प्रतिगता।

गौतमस्वामिपृच्छायां भगवता

तत्प्राग्भवकथनम् - राजगृहे **सुदर्शनो गाथापतिः, प्रिया भार्या, भूता** तत्पुत्री वृद्धकुमारी, श्रीपार्श्वप्रभुदेशनां श्रुत्वा पुष्पचूलाऽऽर्यान्तिके **प्रव्रज्या**, अन्यदा **शरीरबकुशभाव**गततयाऽभीक्ष्णं हस्तादि-धावनम्, शेषं सुभद्रावद् यावत् पृथगु-पाश्रयोपसम्पत्, ततोऽपि स्वच्छन्दमभीक्ष्णं हस्तादिधावनम्, बहुचतुर्थादितपश्चर्या, बहुवर्षश्रमणपर्यायपालना, अनालोचित-प्रतिक्रान्तायाः, कालं कृत्वा **श्रीदेवीत-योपपातः**, स्थितिः, पल्योपमम्, ततश्च्युत्वा **विदेहे सेत्स्यति**।

॥ २२ ॥

(२-१०) एवं **ह्री:**, **धृति:**, **कीर्त्ति:**, **बुद्धि:**, **लक्ष्मी:**, **इलादेवी**, **सुरादेवी**, **रसदेवी**, **गन्धदेवी** अपि वाच्याः। सर्वासामपि स्वनामसदृशं विमानम्।

(५) **वृष्णिदशा** - द्वादशात्राध्ययनानि।

(१) **निषधः** - द्वारिकायां **बलदेव-रेवत्योः** सिंहस्वप्नसूचितः पुत्रो निषधः, ५० राजकन्यापरिणयादिव्यतिकरः, **श्रीनेमिनाथ**देशनां श्रुत्वा **श्रावकधर्मप्रतिपत्तिः**, वरदत्तगणधरपृच्छायां भगवता

तत्प्राग्भवकथनम्, जम्बूद्वीप-भरते रोहित-
कनगरे **महाबलराज-पद्मावतीदेव्योः**
सिंहस्वप्नसूचितः **पुत्रो वीरङ्गकः** ३२
राजकन्यापरिणयादिव्यतिकरः, सिद्धार्था-
ऽऽचार्यदेशनां श्रुत्वा **प्रवज्या**, ११
अङ्गाध्ययनम्, बहुचतुर्थादितपश्चर्या, ४५
वर्षश्रामण्यपर्यायपालनम्, द्विमासिकान-
शनेनाऽऽलोचितप्रतिक्रान्तस्य कालं कृत्वा
**ब्रह्मलोके** मनोरमे विमाने **देवतयोप-
पातः**, स्थितिः १० सागराः। ततश्च्यु-
त्वाऽत्र निषधकुमार एवंविधमनुष्यर्द्धि
सम्पन्नः।

अन्यदा कृतपौषधस्य तस्य भगवद्वन्दनाद्यभिलाषः, पुनर्भगवतस्तत्र समवसरणम्, देशनां श्रुत्वा **प्रव्रज्या**, यावत् ९ वर्षाणि श्रामण्यपर्यायं परिपाल्य २१-दिनानशनेनालोचितप्रतिक्रान्तस्य कालं कृत्वा **सर्वार्थसिद्ध उपपातः**, स्थितिः ३३ सागराः। ततश्च्युत्वा **विदेह** उन्नातनगरे राजपुत्रीभूय स्थविरान्तिके प्रव्रज्य यावन् मासिकानशनेन **सेत्स्यति**।

(२-१२) एवं **अनियः**, **वहः**, **वेहलः**, **प्रगतिः**, **युक्तिः**, **दशरथः**, **दृढरथः**, **महाधनुः**, **सप्तधनुः**, **दशधनुः**,

**शतधनुः**, एतद् ११ कुमारनामानि ११ अध्ययनानि ज्ञेयानि। इति निरयावलिका-श्रुतस्कन्धः, समाप्तान्युपाङ्गानि।

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु बहुश्रुताः। सञ्चयोऽयमाचार्यकल्याणबोधेः कर्मारिशून्य नेत्रे वैक्रमेऽब्दे (वि.सं. २०६८) आषाढसितषष्ठ्यां श्रीशङ्खेश्वर-पार्श्वनाथजैनसङ्घे श्रीआदि-सीमन्धर-जिनप्रसादतः समा-वडोदरापुरे सम्पन्न इति शम्।

## ◆ નવલા નજરાણા ◆

(૧) **તત્ત્વપ્રેમ** → પ.પૂ.શ્રીહરિભદ્રસૂરિ મહારાજા કૃત **યોગબિંદુ** ગ્રંથ પર નવનિર્મિત સંસ્કૃત શ્લોકવાર્ત્તિક.

(૨) **અધ્યાત્મદર્શના** → **મહોપનિષદ્** નામના પ્રાચીન હિંદુ ગ્રંથની નવનિર્મિત સંસ્કૃત ટીકા.

(૩) **સુધોપનિષદ્** → મહો. શ્રીયશોવિજયજી કૃત **વૈરાગ્યકલ્પલતા**-અંતર્ગત '**સમાધિસુધા**' પર નવનિર્મિત સંસ્કૃત ટીકા.

(૪) **શ્રુતમહાપૂજનમ્** → દ્વાદશાંગી સહિત ૮૪ આગમો તથા ૧૦૮ શાસ્ત્રોનું વિધિસહિત પૂજન.

(૫) **ત્રિપદીશતકમ્** → મહો. શ્રીયશોવિજયજી કૃત **અધ્યાત્મસાર** આદિ ગ્રંથો પર પ્રવચનો.

(૬) **પ્રવચનપ્રસૂપનિષદ્** → અષ્ટપ્રવચનમાતા વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.

(૭) **આશાતનોપનિષદ્** → ગુરુ -૩૩ આશાતના વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.

(૮) **તરંગલોલા સમાસ** → પ.પૂ. શ્રીપાદલિપ્તાચાર્ય કૃત **તરંગલોલા** કથાનો નવનિર્મિત સંક્ષિપ્ત સંસ્કૃત ગદ્યાનુવાદ.


(૯) **યોગોપનિષદ્** → ૩૨ યોગસંગ્રહ વિષયક નવનિર્મિત સંસ્કૃત કૃતિ.

(૧૦) **સંદર્ભસંચય** → લગભગ ૩૦૦ પુસ્તકોમાંથી પસાર થઈને વીણેલા મોતીઓ.

(૧૧) **અનુભૂતિગીતા** → આનંદઘનની આત્માનુભૂતિ કળશ કાવ્ય સંચય.

# COMING SOON

## તર્ક + સ્મૃતિ + માર્ગાનુસારી બોધનો પુણ્યપ્રયાગ




પ્રાચીન ગુજરાતીમય-મૂળકૃતિકાર


**મહો. શ્રી યશોવિજયજી મહારાજા**

સંસ્કૃત તાત્પર્યાનુવાદકાર

**આ. શ્રી કલ્યાણબોધિસૂરિજી**

## DON'T MISS IT

### કળિકાળના ધન્ના અણગારની ગૌરવગાથા




રચનાકાર


### વિદ્વદ્વર્ય મુનિરાજશ્રી તીર્થબોધિવિજયજી મ.સા.

एकमेव यथा रत्न-
मावृतं वाऽप्यनावृतम्।
एक एक तथाऽऽत्माऽपि
ह्यावृतो वाऽप्यनावृतः॥

- આત્મસર્વસ્વમ્

(ઉપનિષત્-સર્વસ્વમ્ અંતર્ગત આત્મોપનિષદ્-શ્લોકવાર્તિક)

# *Don't Miss it.*




मूलकारा:

श्रीयश:पालमन्त्रिण:

अनुवादकारा:

आ. श्रीकल्याणबोधिसूरय:

લાભાર્થી

## શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ

એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી (પૂર્વ), મુંબઈ.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરિ ભૂરિ અનુમોદના